# Devaih Krita Ambika Stuti

# દેવૈઃ કૃતા અમ્બિકાસ્તુતિઃ

## Document Information

Text title : Devaih Krita Ambika Stuti

File name : ambikAstutiHdevaiHkRRitA.itx

Category : devii, shivarahasya, stuti, devI

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 14 | 247.2-277.1||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# દેવૈઃ કૃતા અમ્બિકાસ્તુતિઃ

દેવા ઊચુઃ -
નમો દેવ્યૈ નમો દેવ્યૈ નમો દેવ્યૈ નમો નમઃ ॥ ૨૪૭॥

નમો નમો જગદ્ધર્ત્ર્યૈ જગદ્ધાત્ર્યૈ નમો નમઃ ।
નમો નમસ્તે કલ્યાણ્યૈ મઙ્ગલાયૈ નમો નમઃ ॥ ૨૪૮॥

નમો માતર્નમો માતર્નમો માતર્નમો નમઃ ।
નમો માતર્નમો માતર્નમો માતર્નમો નમઃ ॥ ૨૪૯॥

નમો નમસ્તે શર્વાણ્યૈ સુખદાયૈ નમો નમઃ ।
નમો નમસ્તે ભદ્રાયૈ શોભનાયૈ નમો નમઃ ॥ ૨૫૦॥

નમો નમસ્તે શુદ્ધાયૈ શામ્ભવ્યૈ તે નમો નમઃ ।
નમસ્તે પરમેશ્વર્યૈ પરમાયૈ નમો નમઃ ॥ ૨૫૧॥

નમસ્તે ભુક્તિદાયિન્યૈ મુક્તિદાયૈ નમો નમઃ ।
નમસ્તે વિશ્વરૂપિણ્યૈ વિશ્વમાત્રે નમો નમઃ ॥ ૨૫૨॥

નમસ્તે લિઙ્ગરૂપિણ્યૈ ભૂતિદાયૈ નમો નમઃ ।
નમઃ સન્તુષ્ટચિત્તાયૈ પુષ્ટિદાયૈ નમો નમઃ ॥ ૨૫૩॥

નમો નમોઽન્નપૂર્ણાયૈ સુવર્ણાયૈ નમો નમઃ ।
નમશ્ચન્દ્રાવતંસાયૈ સર્વેશ્વર્યૈ નમો નમઃ ॥ ૨૫૪॥

નમસ્તે ચન્દ્રસૂર્યાગ્નિપ્રતિમાયૈ શિવપ્રિયે ।
નમસ્તે ભાગ્યદાયિન્યૈ ભોગદાયૈ નમો નમઃ ॥ ૨૫૫॥

નમસ્તે શાન્તિદાયિન્યૈ શમદાયૈ નમો નમઃ ।
નમસ્તે પુણ્યરૂપિણ્યૈ પુણ્યદાયૈ નમો નમઃ ॥ ૨૫૬॥

નમસ્તે કીર્તિરૂપિણ્યૈ કીર્તિદાયૈ નમો નમઃ ।
નમસ્તે ધર્મરૂપિણ્યૈ ધર્મદાયૈ નમો નમઃ ॥ ૨૫૭॥

નમસ્તે બુદ્ધિરૂપિણ્યૈ બુદ્ધિદાયૈ નમો નમઃ ।
યા ત્વં વિદ્યાસ્વરૂપેણ વિદ્યા મદ્ધૃદયે સ્થિતા ॥ ૨૫૮॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં કીર્તિસ્વરૂપેણ કીર્તિમદ્ધૃદયે સ્થિતા ॥ ૨૫૯॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં પુણ્યસ્વરૂપેણ પુણ્યવદ્ધૃદયે સ્થિતા ॥ ૨૬૦॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં ધર્મસ્વરૂપેણ ધર્મવદ્ધૃદયે સ્થિતા ॥ ૨૬૧॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં શાન્તિસ્વરૂપેણ શાન્તિમદ્ધૃદયે સ્થિતા ॥ ૨૬૨॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં મદસ્વરૂપેણ મદવદ્ધૃદયે સ્થતા ॥ ૨૬૩॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં દયાસ્વરૂપેણ દયાવદ્ધૃદયે સ્થિતા ॥ ૨૬૪॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં જ્ઞાનસ્વરૂપેણ જ્ઞાનિનાં હૃદયે સ્થિતા ॥ ૨૬૫॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં પુષ્ટિસ્વરૂપેણ પુષ્ટિમદ્ધૃદયે સ્થિતા ॥ ૨૬૬॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં તુષ્ટિસ્વરૂપેણ તુષ્ટિમદ્ધૃદયે ॥ ૨૬૭॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં શુભસ્વરૂપેણ શુભવદ્ધૃદિ સંસ્થિતા ॥ ૨૬૮॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં યોગસ્વરૂપેણ યોગિનાં હૃદયે સ્થિતા ॥ ૨૬૯॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં સિદ્ધિસ્વરૂપેણ સિદ્ધિમદ્ધૃદિ સંસ્થિતા ॥ ૨૭૦॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં કલ્યાણરૂપેણ ભક્તકલ્યાણદાયિની ॥ ૨૭૧॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં ધ્યાનસ્વરૂપેણ ભક્તાનાં ધ્યાનદાયિની ॥ ૨૭૨॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યાત્વમૈશ્વર્યરૂપેણ ભક્તૈશ્વર્યપ્રદાયિની ॥ ૨૭૩॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં રક્ષણરૂપેણ ભક્તરક્ષણદાયિની ॥ ૨૭૪॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વમારોગ્યરૂપેણ ભક્તારોગ્યપ્રદાયિની ॥ ૨૭૫॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।
યા ત્વં સુખસ્વરૂપેણ ભક્તનાં સુખદાયિની ॥ ૨૭૬॥

તસ્યૈ શિવાઙ્ગભાગિન્યૈ નમસ્તુભ્યં નમો નમઃ ।

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દેવૈઃ કૃતા અમ્બિકાસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૪ । ૨૪૭।૨-૨૭૭.૧॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 14 . 247.2-277.1 ..

Notes:

As Ambikā અમ્બિકા arrives at the site of Dakṣa Yajña દક્ષ યજ્ઞ, the Devāḥ દેવાઃ (including Viṣṇu વિષ્ણુ, Brahma બ્રહ્મા, Yakṣa-s યક્ષાઃ, Pannaga-s પન્નગાઃ, Gandharva-s ગન્ધર્વાઃ, Siddha-s સિદ્ધાઃ, Vidyādhara-s વિદ્યાધરાઃ) eulogize Her with all humility and reverence.

Encoded and proofread by Ruma Dewan

*Devaih Krita Ambika Stuti*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*